अथावधूतोपनिषत्

ॐ । यमनियमासनप्राणायामप्रत्याहारधारणा-
ध्यानसमाध्यष्टाङ्गयोगः ।

देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः ।
अनुरक्तिः परे तत्त्वे सततं नियमः स्मृतः ॥
सर्ववस्तुन्युदासीनभाव आसनमुत्तमम् ।
जगत्सर्वमिदं मिथ्या प्रतीतिः प्राणसंयमः ॥
चित्तस्यान्तर्मुखीभावः प्रत्याहारस्तु सत्तमः ।
चित्तस्य निश्चलीभावधारणां धारणां विदुः ॥

---

3. 'ष्टाङ्गयोगमुच्यते d3.

4. Before this line d3 inserts: शिखा प्राणमयी वृत्तिर्यमाद्य-ष्टाङ्गसाधनम् ।.

6. सर्ववस्तून्यु° d1-2. उदासीनो for उदासीन d3. भाव *ex conj.*; भावम् all.

9. भाव *ex conj.*; भावं all. धारणां[1] d3 only; धारणा others.

सोऽहं चिन्मात्र एवेति चिन्तनं ध्यानमुच्यते ।
ध्यानस्य विस्मृतिः सम्यक् समाधिरभिधीयते ॥
एवं विशोध्य तत्त्वानि योगी निःस्पृहचेतसा ।
यथा निरिन्धनो वह्निः स्वयमेव प्रशाम्यति ॥
ग्राह्याभावेऽमनःप्राणो निश्चलज्ञानसंयुतः ।
शुद्धसत्त्वे परे लीनो जले सैन्धवपिण्डवत् ॥
मोहजालकनिर्धूतो विश्वं पश्यति स्वप्नवत् ।
सुषुप्तवद्यश्चरति स्वभावपरनिश्चलः ।
निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते ॥
योगी कैवल्यमश्नुत इति । य एवं वेद । इत्युपनिषत् ॥

अवधूतोपनिषत्समाप्ता ॥

---

1. चिन्मात्रमेवेति d3.

2. विस्मृतिः all (read विस्तृतिः?).

5. ऽमनः *ex conj.*; मन (so) all. प्राणो d3; प्राण others. निश्चलं d3.

6. जले *ex conj.*; जला d3; जीवः d1; जानः d2.

8. सुषुप्तिवद् d3. स्वभावं d3.

11. Before the colophon d3 inserts ॐ शान्तिः शान्तिः शान्तिः. After the colophon d1 adds शुभं भवतु, d2 सह नाववतु. Ending of d3: इत्यवधूतोपनिषत्संपूर्णमस्तु । श्रीयोगदिगम्बरार्पणमस्तु ॥.